

## प्रथमः पाठः

# वनराजिसम्पदः।

### पाठप्रवेशः

वन्यजीविवाराचरणं कदा भवति? तस्मिन् समये भवन्तः किं किं कुर्वन्ति ? प्रतिवर्षं कति वृक्षान् वयं रोपयामः? एतादृशस्य वृक्षरोपणस्य आवश्यकता का? सस्यानां पोषणं पालनं च अस्माकं कर्तव्यम् इति जानीमः खलु। सर्वजीविनां सुस्थितये सस्यानि अत्यन्तापेक्षितानि भवन्ति । सस्यसम्पन्नं काननं तु प्रकृतेः अविभाज्यभागोऽस्ति । कस्यचित् वनस्य वाङ्मयचित्रं पश्यामः।

### आमुखम्

प्रकृतिरियं सर्वगुणसम्पन्ना तथा सर्वेषां प्राणिनां समस्तसौभाग्यदायिनी च भवति । तथापि रौद्रमृदुलभावाभ्यां सा सदा अधृष्या अभिगम्या चास्ति। अस्याः विरुद्धमिदं स्वरूपं द्रष्टुं काननमेव गन्तव्यम्। तत्र तमःप्रकाशयोः मिश्रणं तथा मृदुलविह्वलाः रवाः, निम्नोन्नताः भूविभागाः, ह्रस्वोन्नताः वृक्षाः इत्यादीनां वैरुध्यानां मेलनञ्च एकत्रैव द्रष्टुं शक्यते । तद्विषये कवितामेकां पठामः।





घनघोरसुन्दरं बन्धुरं काननं
खगमृगादीनां तु सुखनिशान्तम् ।
नवपल्लवाढ्यं च कुसुमसम्पन्नकं
परितो महीधरं भो:! चकास्ति ।।

वननिर्झरी दरी भ्रमरीभिराकुलात्
मुखरीकृतं चारु सरसीतटम् ।
तरुलताशाखासु नीडजानां तथा
शाखामृगानां च सुखमेलनम् ।।

तरुकोटरान्तरे शुककुलानां, बिले
नकुलस्य शशकस्य विविधस्वनम् ।
नवलताकुञ्जेषु नित्यं वनप्रियैः
कृतमहो! सङ्गीतरससेचनम् ।।

वनशिलातलमेत्य तारापथं वीक्ष्य
मृगकुलाधीशस्य घनगर्जनम् ।
बर्हिणां नर्तनं नवमेघवर्षणं
वनतलं सर्वत्र घोषपूर्णम् ।।

प्रकृतिस्तु मोहनाकारेण भीषणे-
नानन्त्यरूपेण वर्ततेऽत्र ।
वनराजिसम्पदः प्राणिनामिव मर्त्य-
लोकस्य सर्वथा हितकराः स्युः।।



## पदच्छेदः

| | | |
|---|---|---|
| परितो महीधरम् | - | परितः + महीधरम्। |
| भ्रमरीभिराकुलात् | - | भ्रमरीभिः + आकुलात्। |
| प्रकृतिस्तु | - | प्रकृतिः + तु। |
| भीषणेनानन्त्यरूपेण | - | भीषणेन + आनन्त्यरूपेण। |
| वर्ततेऽत्र | - | वर्तते + अत्र। |

## विग्रहः

| | | |
|---|---|---|
| घनघोरसुन्दरम् | - | घनं च घोरं च सुन्दरं च। |
| खगमृगादीनाम् | - | खगाः च मृगाः च खगमृगाः। ते आदयः। तेषाम्। |
| सुखनिशान्तम् | - | सुखं च तत् निशान्तं च। |
| नवपल्लवाढ्यम् | - | नवं च तत् पल्लवं च, तैः आढ्यम्। |
| कुसुमसम्पन्नकम् | - | कुसुमैः सम्पन्नं कुसुमसम्पन्नम्,<br>तदेव कुसुमसम्पन्नकम्। |
| वननिर्झरी | - | वनात् आगता निर्झरी। |
| सरसीतटम् | - | सरस्याः तटम्। |
| तरुलताशाखासु | - | तरवः च लताः च तरुलताः, तासां शाखा, तासु। |
| तरुकोटरान्तरे | - | तरूणां कोटराः तरुकोटराः, तेषाम् अन्तरे। |
| मृगकुलाधीशस्य | - | मृगानां कुलं मृगकुलम्,तस्य अधीशः<br>मृगकुलाधीशः , तस्य। |
| घनगर्जनम् | - | घनं च तत् गर्जनं च। |
| वनराजिसम्पदः | - | वनानां राजिः वनराजिः, सा एव सम्पत् ताः। |

## कोशः

| | | |
|---|---|---|
| काननम् | - | अटव्यरण्यं विपिनं गहनं काननं वनम्। |
| निशान्तम् | - | निशान्तवस्त्यसदनं भवनागारमन्दिरम्। |
| महीधरः | - | महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः।<br>अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः॥ |
| शाखामृगः | - | कपिप्लवंगप्लवगशाखामृगवलीमुखाः<br>मर्कटो वानरःकीशो। |
| दरी | - | दरी तु कन्दरो वा स्त्री देवखातबिले गुहा। |
| वनप्रियः | - | वनप्रियः परभृतः कोकिलः पिकः इत्यपि। |
| बर्ही | - | मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक्।<br>शिखावलः शिखी केकी मेघनादानुलास्यपि। |

## पठनप्रवर्तनानि



### बालकवितां ताललयानुसारम् आलपतु।

**श्रद्धेयाः अंशाः**

उचिततालेन आलपनीयम्।
कवितायाः आशयं ज्ञात्वा भावानुसारम् आलपनीयम्।
पदानाम् उच्चारणं स्फुटतया करणीयम्।



### कवितां पठित्वा आशयं लिखतु।

**श्रद्धेयाः अंशाः**

सम्पूर्णमाशयं ज्ञात्वा लेखनीयम्।
भाषाप्रयोगे उचितवाक्यघटना स्वीकरणीया।
उपन्यासस्य शैली अनुवर्तनीया।



## आशयानुसारं कवितापङ्क्तिं चित्वा लिखतु।

**आशयः**

**क)** पर्वतं परितः वनानि सन्ति।

**ख)** कोकिलाः वल्लीनिकुञ्जेषु मधुरं गायन्ति।

**ग)** आकाशं वीक्ष्य सिंहः उच्चैः गर्जति।

**घ)** वनसम्पदः सर्वेषां प्राणिनाम् अत्यन्तमुपकारप्रदाः भवन्ति।

**ङ)** सस्यानां शाखासु खगाः वानराः च सम्मिलन्ति।

**श्रद्धेयौ अंशौ**

दत्तस्य आशयस्य समुचिता पङ्क्तिः स्वीकरणीया।
कवितापङ्क्तिः पूर्णतया लेखनीया।



## प्रयोगविशेषं ज्ञात्वा उदाहरणानुसारं वाक्यानि लिखतु।

**उदा - अध्यापकस्य** परितः छात्राः तिष्ठन्ति।

**अध्यापकं परितः** छात्राः तिष्ठन्ति।

**क)** वृक्षस्य परितः तृणानि रुहन्ति।

**ख)** सूर्यस्य परितः प्रभावलयं चकास्ति।

**ग)** पर्वतस्य परितः वनानि सन्ति।

**घ)** गजस्य परितः जनाः तिष्ठन्ति।

**श्रद्धेयौ अंशौ**

आशयावबोधः।

उचितविभक्तिप्रयोगः।



## वनसंरक्षणम् इति विषये चर्चां चालयतु टिप्पणीं च लिखतु।

**श्रद्धेयाः अंशाः**

चर्चायां सर्वे भागभाजः भवन्तु।

चर्चासूचकाः स्वीकरणीयाः।

आशयस्य क्रमानुगतम् अवतरणम् ।

चर्चायाः क्रोडीकरणम् ।



**पाठस्य आशयं स्वीकृत्य लघुचित्रनिर्माणं करोतु । (ऐ.सि.टि)**

**श्रद्धेयाः अंशाः**

पाठभागस्य आशयं स्वांशीकृत्य चित्रं निर्मातव्यम् ।

चित्राणि विवरणात्मकानि स्युः।

भावनानुसारं चित्राणि करणीयानि ।



**समानाशययुक्तानां कवितानां समाहरणं करोतु ।**

**श्रद्धेयौ अंशौ**

कवितायाः आशयः सम्यक् अवगन्तव्यः ।

आशयानुसारं कविताः चयनीयाः।

## क्रियापदपरिचयः

| | | | | |
|---|---|---|---|---|
| **चकास्ति** | - | चकासृ दीप्तौ | परस्मैपदी | लट् प्र.पु. ए.व। |
| | | चकास्ति - चकास्तः - चकासति । | | |
| **स्युः** | - | अस भुवि | परस्मैपदी | वि. लिङ् प्र.पु. ब.व। |
| | | स्यात् - स्याताम् - स्युः । | | |
| **वर्तते** | - | वृतु वर्तने | आत्मनेपदी | लट् प्र.पु.ए.व । |
| | | वर्तते - वर्तेते - वर्तन्ते । | | |

## अधिकवाचनांशः

**अन्वयः**

**घनघोरसुन्दरं ........... चकास्ति ।।**

घनघोरसुन्दरं बन्धुरं खगमृगादीनां तु सुखनिशान्तं नवपल्लवाढ्यं कुसुमसम्पन्नकं च काननं महीधरं परितः भोः चकास्ति ।

**वननिर्झरी ........... सुखमेलनम् ।।**

वननिर्झरी, दरी, आकुलात् भ्रमरीभिः मुखरितं चारु सरसीतटम्, तथा तरुलताशाखासु नीडजानां शाखामृगानां च सुखमेलनम् अत्र दृश्यते ।

**तरुकोटरान्तरे ........... सङ्गीतरसकल्पनम् ।।**

तरुकोटरान्तरे शुककुलानाम्, बिले नकुलस्य शशकस्य च विविधस्वनम्, नवलताकुञ्जेषु वनप्रियैः नित्यं कृतं सङ्गीतरससेचनं च वर्तते ।

**वनशिलातलमेत्य ........... घोषपूर्णम् ।।**

वनशिलातलम् एत्य तारापथं वीक्ष्य मृगकुलाधीशस्य घनगर्जनं, बर्हिणां नर्तनं, नवमेघवर्षणं, च अत्र भवन्ति । एवं वनतलं सर्वत्र घोषपूर्णं भवति ।


**प्रकृतिस्तु ........... हितकराः स्युः।।**

प्रकृतिः तु मोहनाकारेण भीषणेन आनन्त्यरूपेण अत्र वर्तते । एताः वनराजिसम्पदः प्राणिनाम् इव मर्त्यलोकस्यापि सर्वथा हितकराः स्युः।

## ल्यबन्तरूपाणि

**एत्य** - आङ् उपसर्गपूर्वकस्य इण् गतौ धातोः रूपम् । ( क्त्वान्तम्- इत्वा )

**वीक्ष्य** - वि उपसर्गपूर्वकस्य ईक्ष्-दर्शने धातोः रूपम् । ( क्त्वान्तम् - ईक्षित्वा )



भवतां विद्यालये जैववैविध्यारामे कानि कानि जीवजालानि भवन्ति? तेषां परिपालनाय किं करणीयम्? वातावरणस्य परिणामः तानि कथं बाधते ? चर्चां नयतु ।